**विषमशिष्ट** न॰ विषमं शिष्टं शासनम् । अनुचितशासने ।

**विषमायुध** पु॰ विषमाणि अयुग्मानि पञ्च आयुधानि बाणा यस्य । पञ्चशरे कामे हला॰विषमेष्वादयोऽप्यत्र । [राजनि॰

**विषमुष्टि** पु॰विषं मुष्णाति मुष–क्तिच् । क्षुपभेदे (विषदोडि)

**विषमृत्यु** पु॰विषात् विषदर्शनात् मृत्युरस्य । चकोरखगे जटा॰

**विषय** पु॰ विषिण्वन्ति स्वात्मकतया विषयिणं निरूपयन्ति सम्बध्नन्ति वा वि+षि–अच् । इन्द्रियगोचरे १शब्दादौ २देशे च अमरः । ३भोगसाधने "विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः" । "शिखुहिमादिर्विषयो मतः" । "प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः" भाषा॰ । "अत्र विषयः भोगसाधनं सर्व्वमेव हि कार्य्यमदृष्टाधीनं यत्र कार्य्यं यददृष्टाधीनं तत् तदुपभोगं साक्षात्परम्परया जनयत्येव न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिब्रह्माण्डान्तं सर्व्वमेव विषयो भवतीत्यर्थः" सि॰ मुक्ता॰ । "विषिण्वन्ति विषयिणं बध्नन्ति स्वेन रूपेण निरूपणीयं कुर्व्वन्तीति विषयाः पृथिव्यादयः सुखादयश्च अस्मदादीनामविषयाश्च तन्मात्रलक्षणाः योगिनामूर्ध्वस्रोतसां च विषयाः" सांख्य॰त॰ कौ॰ । ४नित्यसेविते अमरः । ५अव्यक्ते ६शुक्रे च अजयपालः । ७कान्तादौ ८उपभोग्ये शब्दरत्ना॰ दर्शनियामके "विषयो हि निःशेषार्थःसिनोतिबन्धनार्थकः । विशेषेण सिनोतीति विषयो ऽसौ नियामकः" भट्टका॰ । ९आरोपास्पदे "सारोपान्या तु यत्रोक्तौ विषयो विषयी तथा । विषयन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका" काव्यप्र॰ । १०विचाराङ्गवाक्ये अधिकरणावयवभेदे "विषयो विशयश्चैव पूर्व्वपक्षस्तथोत्तरम् । निर्णयश्चेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृतम्" मीमांसा॰ । [जनि॰ ।

**विषयाज्ञान** न॰ विषयाणां न ज्ञानं यत्र । तन्द्रायाम् रा-

**विषयिन्** न॰ विषयोऽस्त्यस्य इनि । १ज्ञाने "विषयी यस्य तस्यैव" भाषा॰ २इन्द्रिये च । ३विषयासक्ते त्रि॰मेदि॰ । ४राज्ञि ५कामदेवे पु॰ मेदि॰ । विषयिणो भावः तल् । विषयिता ज्ञाननिष्ठे विषयनिरूपिते पदार्थभेदे स्वरूपसम्बन्धभेदे च स्त्री । सा च त्रिविधा विशेष्यनिरूपिता विशेष्यिता, विशेषणनिरूपिता प्रकारिता, संसर्गनिरूपिता संसर्गिता इति गदाधरादयः । गदाधरमते विषयितैव प्रतिबध्यकतावच्छेदिका । जगदीशमते विषयतैवेति भेदः ।

**विषरूपा** स्त्री विषं रूपिकविषं रूपयति अतिक्रामति रूप–क । अतिविषायाम् (आतइच) राजनि॰ । [राजनि॰

**विषलता** स्त्री विष-व्याप्ता लता कर्म॰ । इन्द्रवारुण्याम् ।

**विषविद्या** स्त्री विषाय तन्निहत्तये विद्या । विषघ्नमन्त्रज्ञाने

**विषविधि** पु॰ दिव्यभेदे दिव्यशब्दे ३५८८ पृ॰ दृश्यम् ।

**विषवैद्य** पु॰ विषे विषापहारे वैद्यश्चिकित्सकः । विषमन्त्रविद्यायुते अमरः । [राजनि॰ ।

**विषशालूक** पु॰ विषस्य स्थानस्य शालूकः । पद्मकन्दे

**विषशृङ्गिन्** पु॰ विषं शृङ्गमिवास्त्यस्य इनि । शृङ्गरोमे हारा॰ । [हेमच॰ स्त्रियां ङीप् ।

**विषसूचक** पुं॰स्त्री॰ विषं सूचकं हिंसकमस्य । चकोरखगे

**विषसृक्कन्** पु॰ विषं सृक्क्वे यस्य । शृङ्गरोमे त्रिका॰ ।

**विषहन्त्री** स्त्री विषं हन्ति हन-तृच् ङीप् । १अपराजितायाम् राजनि॰ । २विषहारके त्रि॰ ।

**विषहरी** स्त्री विषं हरति हृ–अच् गौरा॰ ङीष् । १मनसादेव्यां शब्दच॰ । २विद्याभेदे तन्त्रसा॰ [जनि॰ ।

**विषहा** स्त्री विषं हन्ति हन–ड । देवदालीलतायाम् रा-

**विषा** स्त्री विषं मत्रिकविषं नाशकत्वेनास्त्यस्याः अच् । (आतइच) १अतिविषायाम् अमरः २बुद्धौ च उणादि॰

**विषाण** न॰ विष–बा॰ कानच् । १पशुशृङ्गे २हस्तिदन्ते ३कुष्ठौषधे मेदि॰ ४वराहदन्ते हेमच॰५क्षीरकाकोल्याम् ६अजशृङ्ग्यां स्त्री मेदि॰गौरा॰ ङीष् । सा च ७वृश्चिकाल्यां स्त्री राजनि॰ । दन्तिन्यां स्त्री शब्दच॰।

**विषाणिका** स्त्री विषाणमस्त्यस्याः ठन् । १मेषशृङ्ग्याम् (माड़रश्रिङा) रत्नमा॰ । २कर्कटशृङ्ग्याम् ३आवर्त्तक्यां ४सातलायां राजनि॰ ।

**विषाणिन्** पु॰ विषाणमस्त्यस्य इनि । १शृङ्गिणि २हस्तिनि च अमरः । ३शृङ्गाटके ४ऋषभौषधे च पु॰ राजनि॰ ।

**विषाद** पु॰वि+षद–घञ् । १अवसादे हेमच॰ २जड़तायाञ्च ।

**विषादनी** स्त्री विषाय तन्निहत्तये अद्यतेऽसौ अद–ल्युट् । पलाशीलतायाम् राजनि॰ । [२विषहरे त्रि॰।

**विषानल** पु॰ विषस्यानल इव । १विषे हेमच॰ ६त॰ ।

**विषापहा** स्त्री विषमपहन्ति अप+हन-ड । १शुक्लनकट्यां राजनि॰ । २इन्द्रवारुण्यां ३निर्विषायां राजनि॰। ४नागदमन्यां भावप्र॰ । ५अर्कमूलायाञ्च (इश्वरमूल) ६सर्पकङ्कालिकायां रत्नमा॰ । [ङीष् ।

**विषार** पुं॰स्त्री॰ विषमृच्छति ऋ–अण् । सर्पे शब्दच॰ स्त्रियां

**विषाराति** पु॰ ६त॰ । १कृष्णधुस्तूरे राजनि॰ । २विषनाशके च ।